## चतुर्दशः पाठः

# बोधगया

## ( मिश्रित व्याकरण )

[ बौद्धधर्म अन्तरराष्ट्रीय स्थिति के कारण महत्त्वपूर्ण है । इस धर्म के अनुयायी बोधगया को भगवान् बुद्ध की ज्ञानस्थली के कारण बहुत आदर की दृष्टि से देखते हैं तथा यहाँ की यात्रा को अपने जीवन का परम लक्ष्य मानते हैं । बोधगया में भगवान बुद्ध का प्रायः चौदह सौ वर्ष पुराना मन्दिर तथा बोधिवृक्ष वर्तमान है । प्रस्तुत पाठ में बोधगया के धार्मिक महत्त्व तथा वर्तमान परिवेश का संक्षिप्त परिचय है ।]



विहारराज्यस्य गयामण्डले अवस्थितः बोधगया नाम ग्रामः अद्य महतीं प्रसिद्धिं प्राप्नोति । अत्र राजकुमारः सिद्धार्थः वैशाख-पूर्णिमायां बोधिं प्राप्तवान् । ततः परं सः भगवान् बुद्धः इति प्रसिद्धः । बौद्धधर्मस्य सर्वे उपासकाः बोधगयां प्रति श्रद्धां धारयन्ति । अद्य तत्र प्राचीनः अश्वत्थवृक्षः वर्तते । तस्यैव छायायां बुद्धः तपस्यां कृतवान्। तस्य वृक्षस्य समीपमेव बुद्धस्य प्राचीनं महाबोधि-

मन्दिरं वर्तते। मन्दिरे पद्मासने उपविष्टस्य बुद्धस्य पाषाणमूर्तिः वर्तते । प्रतिदिनं सहस्राधिकाः भक्ताः तस्य दर्शनाय आयान्ति ।

तस्य मन्दिरस्य परिसरः शान्तिमयः करुणायुक्तश्च वर्तते । बोधगयायां सम्प्रति विभिन्नानां देशानां निवासिभिः कृतानि बुद्धमन्दिराणि शोभन्ते। यथा—म्याँमार (बर्मा)-मन्दिरम् थाईमन्दिरम्, तिब्बतमन्दिरम्, जापानमन्दिरम् इत्यादि । तत्रैव मगधविश्वविद्यालयस्य मुख्यपरिसरः विशालः वर्तते। अधुना बोधगया रमणीयं दर्शनीयं स्थलम् । सम्पूर्णस्य परिसरस्य स्वच्छता परिवहनव्यवस्था च रमणीया वर्तते । वर्षं यावत् पर्यटकाः बोधगयां गत्वा आत्मानं धन्यं मन्यन्ते । अत्र निरञ्जना नाम नदी पार्श्वे प्रवहति । ग्रीष्मकाले सा शुष्यति । प्रशासनं बोधगयायाः विकासाय निरन्तरं प्रयासं करोति । वयमपि तत्र गत्वा परिसरस्य भ्रमणं कुर्याम ।

## शब्दार्थः

| | | |
|---|---|---|
| विहारराज्यस्य | = | बिहार राज्य के |
| गयामण्डले | = | गया में |
| अवस्थितः | = | स्थित |
| महतीम् | = | बड़ी (को) |
| बोधिम् | = | ज्ञान को |
| प्राप्तवान् | = | प्राप्त किया |
| ततःपरम् | = | उसके बाद |
| धारयन्ति | = | धारण करते हैं/करती हैं |
| अश्वत्थवृक्षः | = | पीपल का पेड़ |
| तस्यैव ( तस्य + एव ) | = | उसका ही/उसी का |
| छायायाम् | = | छाया में |
| कृतवान् | = | किया |
| तस्मिन् | = | उसमें |

| | | |
|---|---|---|
| पद्मासने | = | कमलासन / पद्मासन की अवस्था में |
| उपविष्टस्य | = | बैठे हुए का / की |
| पाषाणमूर्तिः | = | पत्थर की मूर्ति |
| सहस्राधिकाः | = | हजार से अधिक |
| दर्शनाय | = | दर्शन के लिए |
| आयान्ति | = | आते हैं |
| परिसरः | = | आहाता, स्थान |
| करुणा | = | दया |
| सम्प्रति | = | इस समय |
| निवासिभिः | = | निवासियों के द्वारा |
| कृतानि | = | बनाये गये |
| शोभन्ते | = | शोभते हैं |
| तत्रैव ( तत्र+एव ) | = | वहाँ |
| अधुना | = | आजकल |
| रमणीयम् | = | सुन्दर, मनमोहक |
| दर्शनीयम् | = | दर्शन योग्य |
| स्थलम् | = | जगह |
| स्वच्छता | = | सफाई |
| वर्षं यावत् | = | सालों भर / पूरे साल |
| पर्यटकाः | = | यात्री |
| आत्मानम् | = | अपने आप को |
| मन्यन्ते | = | मानते हैं / समझते हैं |

| | | |
|---|---|---|
| पार्श्वे | = | बगल में |
| प्रवहति | = | बहती है |
| शुष्यति | = | सूख जाती / जाता है |
| विकासाय | = | विकास के लिए / विकास को |
| भ्रमणम् | = | घूमना / घूमने का कार्य |
| परिसरस्य | = | आहाते का |
| कुर्याम | = | (हम) करें |

## व्याकरणम्

### सन्धिविच्छेदः

तस्यैव = तस्य + एव (वृद्धिसन्धिः, स्वरसन्धिः)

पद्मासने = पद्म + आसने (दीर्घसन्धिः, स्वरसन्धिः)

करुणायुक्तश्च = करुणायुक्तः + च (विसर्गसन्धिः)

सहस्राधिकाः = सहस्र + अधिकाः (दीर्घसन्धिः, स्वरसन्धिः)

### प्रकृति-प्रत्यय विभागः-

प्राप्नोति = प्र + √आप्, लट्लकारः, प्रथमपुरुषः, एकवचनम्

प्राप्तवान् = प्र + √आप् + क्तवतु (पुं.)

धारयन्ति = √धृ + णिच्, लट्लकारः, प्रथमपुरुषः, एकवचनम् ,

वर्तते = √वृत्, लट्लकारः, प्रथमपुरुषः, एकवचनम्

आयान्ति = आ + √या, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

शोभन्ते = √शुभ, लट्लकारः, प्रथमपुरुषः, बहुवचनम्

करोति = √कृ, लट्लकारः, प्रथमपुरुषः, एकवचनम्

कुर्याम = √कृ, विधिलिङ्लकारः, उत्तमपुरुषः, बहुवचनम्

## अभ्यासः

**मौखिकः**

1. अधोलिखितानां पदानाम् उच्चारणं कुरुत-

प्रसिद्धिम्, श्रद्धाम्, अश्वत्थवृक्षः, सहस्राधिकाः, निरञ्जना, शुष्यति, भ्रमणम् ।

2. अधोलिखितानां पदानाम् अर्थं वदत -

अवस्थितः, अद्य, ततःपरम्, उपविष्टस्य, सम्प्रति, अधुना

**लिखितः**

3. निम्नलिखितानां प्रश्नानाम् उत्तरम् एकेन पदेन लिखत -

(क) बोधगया कस्मिन् मण्डले अस्ति ?

(ख) सिद्धार्थः कदा बोधिं प्राप्तवान् ?

(ग) कस्य छायायां बुद्धः तपस्यां कृतवान् ?

(घ) मन्दिरे बुद्धस्य पाषाणमूर्तिः कस्मिन् आसने वर्तते ?

(ङ) बोधगयापार्श्वे का नदी प्रवहति ?

4. कोष्ठात् उचितरूपं चित्वा रिक्तस्थानं पूरयत-

(क) विहारराज्यस्य .................. मण्डले बोधगया अस्ति । (गया-, नवादा-)

(ख) सिद्धार्थः .................. पूर्णिमायां बोधिं प्राप्तवान् । (आषाढ-, वैशाख-)

(ग) बोधगयायां प्राचीनः .................. वृक्षः वर्तते । (वट-, अश्वत्थ-)

(घ) बुद्धस्य पाषाणमूर्तिः .................. आसने वर्तते । (पद्म-, सिंह-)

(ङ) मगधविश्वविद्यालयस्य मुख्यपरिसरः .................. वर्तते । (गयायाम्, बोधगयायाम्)

**लिखित:**

5. **निम्नलिखितानां शब्दानां प्रयोगेण संस्कृते वाक्यानि रचयत ।**

बोधगया, अद्य, पाषाणमूर्तिः, भक्तः, प्रशासनम् ।

6. **अर्थानुसारेण पदानि सुमेलयत**

| | पद | | अर्थ |
|---|---|---|---|
| (क) | अद्य | – | इस समय |
| (ख) | सम्प्रति | – | आज |
| (ग) | अत्र | – | वहाँ |
| (घ) | तत्र | – | यहाँ |
| (ङ) | रमणीयम् | – | देखने योग्य |
| (च) | दर्शनीयम् | – | मनमोहक |

7. **रिक्तस्थानानि पूरयत -**

| | एकवचन | द्विवचन | बहुवचन |
|---|---|---|---|
| (क) | ग्रामः | ........... | ............... |
| (ख) | उपासकः | उपासकौ | ............... |
| (ग) | धारयति | धारयतः | ............... |
| (घ) | करोति | ........... | ............... |

8. **अधोलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत -**

(क) तस्य + एव = ...............................

(ख) पद्म + आसने= ...............................

(ग) सहस्राधिकाः = ...............................

(घ) करुणायुक्तश्च = ...............................

(ङ) तत्रैव = ...............................

९. एतेषु किं सत्यम् अथवा असत्यम् लिखत –

(क) बोधगया विहारस्य गयामण्डले अस्ति ।

(ख) राजकुमारः सिद्धार्थः आषाढपूर्णिमायां बोधिं प्राप्तवान् ।

(ग) अश्वत्थवृक्षस्य समीपमेव बुद्धस्य प्राचीनं महाबोधिमन्दिरं वर्तते ।

(घ) बुद्धः वटवृक्षस्य छायायां तपस्यां कृतवान्

(ङ) बोधगयायां जलमन्दिरम् अस्ति ।

## योग्यता-विस्तारः

बौद्ध धर्म के प्रवर्तक सिद्धार्थ कपिलवस्तु के राजा शुद्धोदन के पुत्र थे । उनक आविर्भाव-काल 563 ई० पू० से 483 ई० पू० माना गया है । आरम्भ से ही उनकी अभिरुचि वैराग्य में थी । राजा ने उनका विवाह यशोधरा से कर दिया । उन्हें राहुल नामक पुत्र भी हुअ किन्तु एक दिन अत्यधिक विरक्ति के कारण वे राजभवन छोड़कर निकल गये तथा विभिन्न स्थानों पर अपनी जिज्ञासाओं का समाधान खोजते-खोजते अंत में बोधगया पहुँचे । उस समय वह 'उरुवेला' नाम का गाँव था । कई दिनों की तपस्या के बाद एक पीपल के वृक्ष के नीचे वैशाख पूर्णिमा को सिद्धार्थ को ज्ञान (बोधि) प्राप्त हुआ । उस समय उनकी आयु 35 वर्ष की थी । बोधि प्राप्ति के बाद उन्हें 'बुद्ध' कहा गया । अपने जीवन के शेष 45 वर्षों तक बिहार और उत्तर प्रदेश के विभिन्न स्थानों में उन्होंने घूम-घूमकर धर्म का प्रचार किया । बाद में इस धर्म को राज्याश्रय मिला । अशोक ने श्रीलंका, बर्मा (म्याँमार), चम्पा (थाइलैंड) इत्यादि देशों में धर्म-प्रचारक भेजे । कालान्तर में तिब्बत, गांधार, चीन तथा जापान में भी यह धर्म पहुँच गया ।

बोधगया बुद्ध के बोधि-लाभ (निर्वाण) से सम्बद्ध होने के कारण एशियाई देशों में बहुत लोकप्रिय तथा प्रतिष्ठित है । प्रतिवर्ष लाखों यात्री यहाँ तीर्थ-यात्रा के लिए आते हैं । सभी देशों के अपने-अपने मन्दिर बने हुए हैं जिनमें बुद्ध की अत्यन्त सुन्दर और बहुमूल्य प्रतिमाएँ लगी हुई हैं ।

*****